# shrIdhanvantaryaShTottarashatanAmastotram

# શ્રીધન્વન્તર્યષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : dhanvantaryaShTottarashatanAmastotram

File name : dhanvantaryaShTottarashatanAmastotram.itx

Category : vishhnu, aShTottarashatanAma

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran

Latest update : March 10, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 14, 2023

*sanskritdocuments.org*

# શ્રીધન્વન્તર્યષ્ટોત્તરશતનામસ્તોત્રમ્

ધન્વન્તરિઃ સુધાપૂર્ણકલશઢ્યકરો હરિઃ ।
જરામૃતિત્રસ્તદેવપ્રાર્થનાસાધકઃ પ્રભુઃ ॥ ૧॥

નિર્વિકલ્પો નિસ્સમાનો મન્દસ્મિતમુખામ્બુજઃ ।
આઞ્જનેયપ્રાપિતાદ્રિઃ પાર્શ્વસ્થવિનતાસુતઃ ॥ ૨॥

નિમગ્નમન્દરધરઃ કૂર્મરૂપી બૃહત્તનુઃ ।
નીલકુઞ્ચિતકેશાન્તઃ પરમાદ્ભુતરૂપધૃત્ ॥ ૩॥

કટાક્ષવીક્ષણાશ્વસ્તવાસુકિઃ સિંહવિક્રમઃ ।
સ્મર્તૃહૃદ્રોગહરણો મહાવિષ્ણ્વંશસમ્ભવઃ ॥ ૪॥

પ્રેક્ષણીયોત્પલશ્યામ આયુર્વેદાધિદૈવતમ્ ।
ભેષજગ્રહણાનેહસ્સ્મરણીયપદામ્બુજઃ ॥ ૫॥

નવયૌવનસમ્પન્નઃ કિરીટાન્વિતમસ્તકઃ ।
નક્રકુણ્ડલસંશોભિશ્રવણદ્વયશષ્કુલિઃ ॥ ૬॥

દીર્ઘપીવરદોર્દણ્ડઃ કમ્બુગ્રીવોઽમ્બુજેક્ષણઃ ।
ચતુર્ભુજઃ શઙ્ખધરશ્ચક્રહસ્તો વરપ્રદઃ ॥ ૭॥

સુધાપાત્રોપરિલસદામ્રપત્રલસત્કરઃ ।
શતપદ્યાઢ્યહસ્તશ્ચ કસ્તૂરીતિલકાઞ્ચિતઃ ॥ ૮॥

સુકપોલસ્સુનાસશ્ચ સુન્દરભ્રૂલતાઞ્ચિતઃ ।
સ્વઙ્ગુલીતલશોભાઢ્યો ગૂઢજત્રુર્મહાહનુઃ ॥ ૯॥

દિવ્યાઙ્ગદલસદ્બાહુઃ કેયૂરપરિશોભિતઃ ।
વિચિત્રરત્નખચિતવલયદ્વયશોભિતઃ ॥ ૧૦॥

સમોલ્લસત્સુજાતાંસશ્ચાઙ્ગુલીયવિભૂષિતઃ ।
સુધાગન્ધરસાસ્વાદમિલદ્ભૃઙ્ગમનોહરઃ ॥ ૧૧॥

લક્ષ્મીસમર્પિતોત્ફુલ્લકઞ્જમાલાલસદ્ગલઃ ।
લક્ષ્મીશોભિતવક્ષસ્કો વનમાલાવિરાજિતઃ ॥ ૧૨॥

નવરત્નમણીક્લૃપ્તહારશોભિતકન્ધરઃ ।
હીરનક્ષત્રમાલાદિશોભારઞ્જિતદિઙ્મુખઃ ॥ ૧૩॥

વિરજોઽમ્બરસંવીતો વિશાલોરાઃ પૃથુશ્રવાઃ ।
નિમ્નનાભિઃ સૂક્ષ્મમધ્યઃ સ્થૂલજઙ્ઘો નિરઞ્જનઃ ॥ ૧૪॥

સુલક્ષણપદાઙ્ગુષ્ઠઃ સર્વસામુદ્રિકાન્વિતઃ ।
અલક્તકારક્તપાદો મૂર્તિમદ્વાધિપૂજિતઃ ॥ ૧૫॥

સુધાર્થાન્યોન્યસંયુધ્યદ્દેવદૈતેયસાન્ત્વનઃ ।
કોટિમન્મથસઙ્કાશઃ સર્વાવયવસુન્દરઃ ॥ ૧૬॥

અમૃતાસ્વાદનોદ્યુક્તદેવસઙ્ઘપરિષ્ટુતઃ ।
પુષ્પવર્ષણસંયુક્તગન્ધર્વકુલસેવિતઃ ॥ ૧૭॥

શઙ્ખતૂર્યમૃદઙ્ગાદિસુવાદિત્રાપ્સરોવૃતઃ ।
વિષ્વક્સેનાદિયુક્પાર્શ્વઃ સનકાદિમુનિસ્તુતઃ ॥ ૧૮॥

સાશ્ચર્યસસ્મિતચતુર્મુખનેત્રસમીક્ષિતઃ ।
સાશઙ્કસમ્ભ્રમદિતિદનુવંશ્યસમીડિતઃ ॥ ૧૯॥

નમનોન્મુખદેવાદિમૌલીરત્નલસત્પદઃ ।
દિવ્યતેજઃપુઞ્જરૂપઃ સર્વદેવહિતોત્સુકઃ ॥ ૨૦॥

સ્વનિર્ગમક્ષુબ્ધદુગ્ધવારાશિર્દુન્દુભિસ્વનઃ ।
ગન્ધર્વગીતાપદાનશ્રવણોત્કમહામનાઃ ॥ ૨૧॥

નિષ્કિઞ્ચનજનપ્રીતો ભવસમ્પ્રાપ્તરોગહૃત્ ।
અન્તર્હિતસુધાપાત્રો મહાત્મા માયિકાગ્રણીઃ ॥ ૨૨॥

ક્ષણાર્ધમોહિનીરૂપઃ સર્વસ્ત્રીશુભલક્ષણઃ ।
મદમત્તેભગમનઃ સર્વલોકવિમોહનઃ ॥ ૨૩॥

સ્રંસન્નીવીગ્રન્થિબન્ધાસક્તદિવ્યકરાઙ્ગુલિઃ ।
રત્નદર્વીલસદ્ધસ્તો દેવદૈત્યવિભાગકૃત્ ॥ ૨૪॥

સઙ્ખ્યાતદેવતાન્યાસો દૈત્યદાનવવઞ્ચકઃ ।
દેવામૃતપ્રદાતા ચ પરિવેષણહૃષ્ટધીઃ ॥ ૨૫॥

ઉન્મુખોન્મુખદૈત્યેન્દ્રદન્તપઙ્ક્તિવિભાજકઃ ।
પુષ્પવત્સુવિનિર્દિષ્ટરાહુરક્ષઃશિરોહરઃ ॥ ૨૬॥

રાહુકેતુગ્રહસ્થાનપશ્ચાદ્ગતિવિધાયકઃ ।
અમૃતાલાભનિર્વિણ્ણયુધ્યદ્દેવારિસૂદનઃ ॥ ૨૭॥

ગરુત્મદ્વાહનારૂઢઃ સર્વેશસ્તોત્રસંયુતઃ ।
સ્વસ્વાધિકારસન્તુષ્ટશક્રવહ્ન્યાદિપૂજિતઃ ॥ ૨૮॥

મોહિનીદર્શનાયાતસ્થાણુચિત્તવિમોહકઃ ।
શચીસ્વાહાદિદિક્પાલપત્નીમણ્ડલસન્નુતઃ ॥ ૨૯॥

વેદાન્તવેદ્યમહિમા સર્વલોકૈકરક્ષકઃ ।
રાજરાજપ્રપૂજ્યાઙ્ઘ્રિઃ ચિન્તિતાર્થપ્રદાયકઃ ॥ ૩૦॥

ધન્વન્તરેર્ભગવતો નામ્નામષ્ટોત્તરં શતમ્ ।
યઃ પઠેત્સતતં ભક્ત્યા નીરોગસ્સુખભાગ્ભવેત્ ॥ ૩૧॥

ઇતિ બૃહદ્બ્રહ્માનન્દોપનિષદાન્તર્ગતં
શ્રીધન્વન્તર્યષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shrIdhanvantaryaShTottarashatanAmastotram*

pdf was typeset on November 14, 2023

Please send corrections to *sanskrit@cheerful.com*